प्रणम्य भूपतिं दूरात्प्रतीहारनिवेदितः ।
स पुष्पोपायनोपेतो वनपालो व्यजिज्ञपत् ॥ २७ ॥

स्वामिन्मधुव्रतव्रातझङ्कारबधिरीकृते ।
वने समागतः साधुर्भव्याम्भोरुहभास्करः ॥ २८ ॥

श्रुत्वेति वचनं तस्य राजा सन्तुष्टमानसः ।
सान्तःपुरः ससामन्तः स जगाम विवन्दिषुः ॥ २९ ॥

तथा निर्यान्तमालोक्य राजानं नगरीजनः ।
चचाल निखिलो नूनं लोको राजानुवर्तकः ॥ ३० ॥

अथोद्यानं समासाद्य त्यक्तराजपरिच्छदः ।
त्रिःपरीत्य तमाचार्यं नमश्चक्रे महीपतिः ॥ ३१ ॥

यथास्थानं निविष्टेषु भव्यलोकेषु भूपतिः ।
पप्रच्छेति मुनिं धीमान् कारणं बन्धमोक्षयोः ॥ ३२ ॥

मिथ्यात्वाविरती योगाः प्रमादा बन्धकारणम् ।
कषायाश्च जिनैर्दिष्टाः केवलामललोचनैः ॥ ३३ ॥

अश्रद्धानं पदार्थानां जिनोक्तानां यथागमम् ।
तन्मिथ्यात्वं द्विधा तच्च स्वभावाधिगताश्रयम् ॥ ३४ ॥

तत्र स्वभावमिथ्यात्वमेकाक्षविकलाङ्गिनाम् ।
तदेवासंज्ञिनामेकं संज्ञिनां द्वितयं मतम् ॥ ३५ ॥

एकान्तः संशयो मूढो विपरीतश्चतुर्थकः ।
विनयाज्ञानभेदेन षोढेत्याप्ताहितं भवेत् ॥ ३६ ॥

कालात्सर्वसमुत्पत्तिः स्वभावान्नियतेरपि ।
कर्मणो नरचेष्टातस्तदेवैकान्तिकं मतम् ॥ ३७ ॥

यथापृष्टं मया ज्ञातं कारणं बन्धमोक्षयोः ।
प्रीतिश्च भंगुरा नित्यं संसारे सारवर्जिते ॥ ५१ ॥
देहो रोगशतापूर्णो यौवनं क्षणभंगुरम् ।
सुखं दुःखसमाक्रांतं विषया विषसन्निभाः ॥ ५२ ॥
विभाव्यैवं मयाम्भोपेनिर्विण्णोस्मि महामुने ।
दीक्षयाद्यमहं कर्तुं तत्प्रसीद ममाधुना ॥ ५३ ॥
गुरोराज्ञां समादाय भूयो भूपतिभिः समम् ।
ममत्वं सर्वथा हित्वा दीक्षां जैनेश्वरीं श्रितः ॥ ५४ ॥
निवेशयात्मपदे पुत्रं वणिक्कूपतिरपि व्रती ।
बभूव सङ्गनिर्मुक्तस्तितीर्षुर्भववारिधिम् ॥ ५५ ॥
अत्रान्तरे मुनिं नत्वा धर्मं श्रेष्ठिसुतावय ।
पप्रच्छतुः गृहस्थानां सोऽप्यवादीद्दयार्द्रधीः ॥ ५६ ॥
पततो दुर्गतौ यस्मात्प्राणिनो धारयत्यसौ ।
तेनान्वर्थो जगत्येष धर्मः सद्भिर्निगद्यते ॥ ५७ ॥
आत्मवत्सर्वभूतानां दर्शनं तस्य लक्षणम् ।
स च द्विधा जिनप्रोक्तः सागारेतरभेदतः ॥ ५८ ॥
तत्र सागारिणां धर्मः सम्यग्दर्शनपूर्वकः ।
व्रतशीलोपवासैः स्यात्साधुदानजिनार्चनैः ॥ ५९ ॥
मिथ्यात्वदोषतो नूनं नश्यत्येव स देहिनः ।
विषसङ्गाद्यथा शक्तिः सर्वांपयवसंभवा ॥ ६० ॥
नष्टस्तु दुर्लभो नूनं रत्नं रत्नाकरे यथा ।
तस्मान्मिथ्यात्वमुत्सृज्य सेवध्वं धर्ममुत्तमम् ॥ ६१ ॥
स्वर्गसौख्यफलं स्वादु सर्वेन्द्रियसुखावहम् ।
धर्मद्रुमः फलत्येव सिक्तो दर्शनवारिणा ॥६२॥
भीमे रणाङ्गणे धर्मो दुर्भेद्यकवचायते ।
नाप्यते हि परं धर्मः पारावारे निमज्जताम् ॥ ६३ ॥

[illegible] धर्मे [illegible]नाशिनम् ।
[illegible] ॥ ६४ ॥
[illegible] ।
[illegible] ॥ ६५ ॥
[illegible] ।
[illegible] ॥ ६६ ॥
[illegible]
[illegible] ॥ ६७ ॥
[illegible]
[illegible] ॥ ६८ ॥
[illegible] ।
[illegible] ॥ ६९ ॥
[illegible]
[illegible] ॥ ७० ॥
[illegible]
[illegible] ॥ ७१ ॥
[illegible] ।
[illegible] ॥ ७२ ॥
[illegible] ।
[illegible] ॥ ७३ ॥
[illegible]
[illegible] ॥ ७४ ॥
[illegible] ।
[illegible] ॥ ७५ ॥
[illegible] ।
[illegible] ॥ ७६ ॥
[illegible] ।
[illegible] ॥ ७७ ॥

जैनमार्गतिरस्कारकालकूटविषद्रुमः ।
सिक्तो मिथ्यात्ववतो येन फलत्येषाशुभं फलम् ॥ ७८॥

इति निश्चित्य सम्बन्धं मुनिवाक्येन तौ तयोः ।
द्रापयामासतुर्द्धर्मं प्रेमकारुण्यसङ्गतौ ॥ ७९ ॥

लब्ध्वा धर्मं ततः श्रुत्वा पूर्वजन्मसुतादिकम् ।
शोकविस्मयपूर्णाङ्गो मातंगो मुनिमब्रवीत् ॥ ८० ॥

त्वत्प्रसादान्मया नाथ ज्ञातमात्मविचेष्टितम् ।
कृतं भुक्तं च यत्पूर्वं समं सरमयानया ॥ ८१ ॥

क जन्म तद्द्विजातीयं क च मातङ्गता मुनिः ।
इति संचिन्त्य चित्तं मे शोकेनातीव ताम्यति ॥ ८२॥

क्रोधशोकभयोन्मादमृत्युजन्मजरामयम् ।
संसरामो न संसारं पुनर्येन तथा कुरु ॥ ८३ ॥

इत्युक्त्वासौ गुरोर्वाक्यात् मासं संन्यस्य धीरधीः ।
नन्दीश्वरसुरो जातः पल्यायुः सुपरिच्छदः ॥ ८४ ॥

दिनानि सप्त संन्यस्य सरमा स्मरमानसा ।
तत्पुरेर्नृपतेर्जाता कन्यका सुन्दराकृतिः ॥ ८५ ॥

निःशेषागतभूपाले तोषात्तस्याः स्वयम्वरे ।
दृष्ट्वा नन्दीश्वरो देवस्तामवादीत्सुलोचनाम् ॥ ८६ ॥

जन्मद्वयानुभूतं किं तद्दुःखं तव विस्मृतम् ।
क्रियते येन भोगेषु मनस्त्वयकस्यात्मनो हितम् ॥८७॥

इत्यादिपूर्ववृत्तान्तमाकर्ण्यासौ सुरोत्तमात् ।
प्रव्रज्यासीप सविप्रा कालेन च दिवं ययौ ॥ ८८ ॥

कथाप्रसङ्गतः प्रोक्तं सद्वृत्तमिह भूपते ।
प्रस्तुतं प्रोच्यतेऽस्माभिरिदानीं श्रेष्ठिपुत्रयोः ॥ ८९ ॥

अतिचारा भ्रमाः काश्चिद्धर्मेण च सुरेण च ।
सल्लेखनां विधायान्ते सौधर्मकल्पमाश्रितौ ॥ ९० ॥

---

१ ध्वनी । २ वर्षान् ।

सप्तमः सर्गः ।

पूर्वसूचितमनोज्ञजनान्ते कौशलेति नगरी रमणीया ।
हिमनाम इति नाम नरेन्द्रः शास्ति तां दिविमिवामरनाथः ॥ १ ॥
कौमुदीव कुमुदाकरबन्धोः पार्वतीव शशिखण्डधरस्य ।
धिकमेकरसिकस्य मृगाक्षी धारिणी प्रियतमास्य बभूव ॥ २ ॥
यौवनोचितसुखानि यथेष्टं तेन सार्धमनुभूय नृपेण ।
स्वर्गतश्च्युतसुरद्वितयं सा तत्क्रमेण सुतयुग्ममसूत ॥ ३ ॥
तत्र पूर्वमकरोन्मधुसंज्ञं कैटभाख्यमितरं च नरेन्द्रः ।
रूपयौवनकलागुणपूर्णौ तौ समीक्ष्य समचिन्तयदेवम् ॥ ४ ॥
अन्वये महति जन्म नृपत्वं कांतिकीर्तिदयितास्तनयौ च ।
मर्त्यजन्मफलमाप्तमशेषं युक्तमात्महितमद्य विधातुम् ॥ ५ ॥
एवं यथाविधि निवेश्य स राज्यं कैटभं च विदधे युवराजम् ।
भोगसङ्गविमुखः सह देव्या शिश्रियेव पदवीं श्रमणानाम् ॥ ६ ॥
तौ प्रतापमनुरागसुधांकैः विप्रतापहितमित्रजनेषु ।
भूधराधिपशिरःकृतपादौ रेजतुः शशिदिवाकरतुल्यौ ॥ ७ ॥
अन्यदा भुवमयपवनीशः शुश्रुवानविहृतादितिवार्ताम् ।
देशदाहजनतोपनिकारो देवदुर्गमविनाशपभीमः ॥ ८ ॥
तन्निशम्य कुपितो नरनाथो भ्रूविभङ्गकुटिलारुणनेत्रः ।
भूरिसारबलरेणुभिराशाः पूरयन्नुपरि तस्य चचाल ॥ ९ ॥
दन्तिदन्तदलितद्रुमखण्डाः चक्रिचक्रविषमीकृतमार्गाः ।
तुङ्गवाजिखुरखण्डितशैलास्तद्बलैः पथि कृता वनदेशाः ॥ १० ॥
तं प्रयाणकवशादुपयान्तं वासरैः कतिपयैः स्वपुरान्ते ।
सेवितुं परिवृढं दृढभक्तिः आप काञ्चनरथः कनकाभः ॥ ११ ॥

जगाद सचिवो नहि युक्तं कर्म कर्तुमुभयत्र विरुद्धम् ।
त्यमेव यदि तत्प्रतिपाल्यः कश्चनापि समयो नृपचन्द्र ॥ २५ ॥
ाभिमेति न यथा परिवारो रक्ष्यते च प्रविदाधपवादः ।
ां तथा तव विधास्यति वक्ष्यां बुद्धिकौशलवशेन जनोऽयम् २६
ोपरोधमिति तस्य वचांसि प्रत्यपद्यत नृपः सचिवस्य ।
भ्रचाल च ततः स कथञ्चित्संस्मरन्प्रियतमामधिरामम् ॥२७॥
ासयन् गिरितटानि महान्ति प्रापयंश्च विपिनानि विकाशम् ।
ोषयंश्च सरित सुगभीरा भूपतिः स रिपुदेशमवाप ॥ २८ ॥
ष्टिने सति बले रिपुदुर्गे भीष्मयोधसमधिष्ठितमध्ये ।
ीरपञ्जिसबलान्यथ भीमो निर्जगाम रभसा समरार्थम् ॥ २९ ॥
हुसघदुलयाजितपङ्के प्रस्फुरद्धिमलचामरफेने ।
रुत्सारितरिपुद्विपकुम्भमौलसन्मसृणमौक्तिकचिह्ने ॥ ३० ॥
प्रहारगलिताश्मझलापे तुङ्गकुञ्जरशिलोच्चयदुर्गे ।
ोधघातपतितैर्गजपादैर्यत्र कच्छपसमैः समभावि ॥ ३१ ॥
स्फल्नपतिना गजहस्तास्तुल्यतामुपययुर्मकराणाम् ।
त्र सागरसमे समरे द्राग् तं कथंचन विजित्य बबंध ॥ ३२ ॥
प्रराजकशिरोमणिरश्मिद्योतिताङ्घ्रिसरसीरुहयुग्मः ।
त्र दैहि सचिवाभिनिवेद्य स्वां पुरीं प्रतिजगाम कृतार्थः ॥३३॥
ीलनीरभरपूरितमध्या निम्नगा निजयशोघनपङ्काः ।
न्यता कृतसमुत्सवलोका कोशला नृपतिना समभावि ॥ ३४ ॥
ां प्रविश्य विहितापणशोभां मार्गरे पुरमुदस्तपताकम् ।
ीतसत्यामिति निरुत्सुकचित्तो राजमन्दिरमवाप च नूत्यः ॥३५॥
त्र मङ्गलदानानि विचित्रं गीतमुद्धतबुधाः प्रमदाश्च ।
ासनानि दशनानि विभूषाः सर्वमस्य विफलामुपयातम् ॥३६॥
यंतो मुकुलयन् सहकारान् पुष्पयन्नु वनं वनराजीम् ।
तरेश्च समवाप वसंतः शारसेवनमिव क्षतमध्ये ॥ ३७ ॥

अन्तरेऽत्र कलकोकिलनादं प्रहुतैर्मधुव्रतं कृतशोभम् ।
पुण्यपुञ्जरजसामिवसमन्तादासितं कनकभूधररम्यम् ॥ ५१ ॥
भूषितं घनमुदारतरेण सहसंतविभवेन निशम्य ।
भूपतिः सह नृपैः सकलत्रैः क्रीडितुं वनमगात्तरलवेन ॥ ५२ ॥
यद्वकुञ्जलतया सहकारैर्जातपल्लवनया च लताभिः ।
प्रस्खलन्धनतया सुमनोभिः कल्पितार्घमिव सद्मनमासीत् ॥ ५३ ॥
स्वेच्छया कतिचिदेव दिनानि क्रीडितं नृपतिभिः सकलत्रैः ।
तत्र चारुवनिताजनमध्ये साम्यतिस्म पुरमेव नृपेन्द्रः ॥ ५४ ॥
उत्सवं समनुभूय नरेन्द्रो राजकं च परितोष्य यथेष्टम् ।
वस्त्रवाहनविभूषणदानैः सत्वरं सदयितं विससर्ज ॥ ५५ ॥
विवसे स युवयोरनुरूपं यस्य साम्प्रतमलंकृतिजातम् ।
पृष्टतोऽरिबहुलो विषयस्ते सद्म स्वमिति शाधि सपत्नान् ॥५६॥
वासराणि कतिचिन्मद गृहेस्मिन्तिष्ठतु प्रियतमा तव तावत् ।
प्रेषयाम्यनुपदेपि विभूष्य भूषणैर्विरचितामरचापैः ॥ ५७ ॥
तत्तथेति वचनं प्रतिपद्य भूपतेः सपदि हैमरथोपि ।
सोऽपिदत्तसहितां निजपत्नीं तां विमुच्य स जगाम विशङ्कः ॥५८॥
अन्तरेऽत्र विरहानलतप्तं भूपतिं समवलोक्य दिनेशः ।
संतप्त इव तदाश्रयणासौ पश्चिमं जलनिधिं प्रतिपेदे ॥ ५९ ॥
लोललोचनजलाप्लुतानि क्रन्दितध्वनिविभिन्नमनांसि ।
चक्रवाकमिथुनानि वियोगे जीवितं विधृनयंति कथञ्चित् ॥ ६० ॥
चकृतिमिथुनानि वियोगं स्तम्भयन्मुकुलयन्कमलानि ।
कामिनां च जनयन्परितोषं भानुमान् जलनिधौ निममज्ज ॥ ६१ ॥
पश्चिमार्णवतरङ्गसहस्रैरूर्ध्वपातितमिरतीव विलोलैः ।
तत्क्षणात्समभवत् पाटलरागारसालितेव गलिता ननु सन्ध्या ॥६२॥
सससलिकरपातभियेव यत्तमो गिरिगुहासु निलीनम् ।
तद्व्यजृम्भत गते दिननाथे को न कालवशमाप्य बलीयान् ॥ ६३ ॥

निघ्नमुग्ध [illegible]
दुर्नेनम्य [illegible] ॥
सद्विशात [illegible]
इन्दुर्नीत्नमत [illegible]
मान्द्रमः रवमम [illegible]
मांगानिव तन्त्रां दयम [illegible] ।
केतकीकुसुमक [illegible]
मन्दमन्दमुदितकन्तु [illegible]
ज्योत्स्नयति रुचले भुवनान्त [illegible]
सा विभूषणमिषण मृगाक्षी [illegible] ।
चाटुभि मपरिहासमयवाग्भिस्ता तथा ममनत [illegible]
जातमस्य च यथा चरितार्थं यावन च मदना [illegible] ॥
लोचनान्तकनिरीक्षणमन्त कूजितं च हसितं च [illegible]
घूर्णितञ्च चिन्तितञ्च स्तनञ्च व्याजहार [illegible] ॥ ७० ॥
गीतनृत्यपरिहास्यकथाभिर्दीर्घिकाजलवनान्तविहार
तत्र तौ रतिसुखार्णवमग्नौ अन्नतुर्न समय ममतानम ॥ ७१ ॥
सौधिदह्लयवचनादथ वार्ता तां निशम्य नृपहेमरथोऽपि ।
वल्लभास्मरणजातनिदुःखात्मन्मथग्रहवशाद्विवशोऽभूत् ॥ ७२ ॥
शून्यमेव हसतिस्म स मोहं यात्यकारणमुपैति च गेहात् ।
कण्ठपीठविलुठद्घनवाष्पं हा प्रियेति दयिते च रुरोद ॥ ७३ ॥
कामदुर्दमपिशाचवशेन भ्रष्टराज्यविभवः स धरित्र्याम् ।
हा प्रियेति कृततारविरावं भ्राम्यतिस्म शिशुभिः परिवीतः॥ ७४ ॥
धूलिधूसरशिरोरुहगात्रः स्कंधलम्बितपटच्चरकन्थः ।
बम्भ्रमन्प्रतिपुरं प्रतिरथ्यं कोशलं प्रति जगाम स दैवात् ॥ ७५ ॥
तत्र वल्लभतमाह्वयमुच्चैरुच्चरन्ननु जनं समधावत् ।
धावमानमवलोक्य तथा तं धात्रिका सुबहुदुःखमरोदीत् ॥ ७६ ॥

बाष्पपूर्णनयनान्तमकाण्डे तां विलोक्य रुदतीं समपृच्छत् ।
वल्लभा नृपतिहेमरथस्य रुद्यतेऽम्ब किमकारणमेव ॥ ७७ ॥

सा तदाभ्युपगताथ कथञ्चिद्गद्गदस्वरमचीकथदेवम् ।
त्वद्वियोगजनितं दुरवस्थं वीक्ष्य पुत्रि रुदितं तव भर्तुः ॥ ७८ ॥

धात्रिकावचनमश्रुतपूर्वं सा निशम्य सहसैव चुकोप ।
युज्यतेम्ब कटुकं तव वक्तुमीदृशं मम सुदुःखविधायि ॥ ७९ ॥

पार्वणेन्दुवदनस्तरलाक्षो दीर्घपीवरभुजो मम भर्ता ।
यत्पदाम्बुजरजोऽपि नरेन्द्रैरुह्यते स्रगिव मूर्धभिरुच्चैः ॥ ८० ॥

रूपनिर्जितमनोभवकीर्तेस्तस्य किं वद नृपस्य दूषणम् ।
इत्युदीरितवतीं निजपुत्रीं प्रत्यवोचत भद्रा किल धात्री ॥ ८१ ॥

लक्षणानि च गतिं च वचांसि पुत्रि सम्यगिरूपय तावत् ।
तन्निरूप्य च तथेति विदित्वा सा निजं प्रियतमं विषसाद ॥ ८२ ॥

यावदास्त विनिगूढविषादं साग्रसौधशिखरे सह धात्र्या ।
तावदाप शरदाहितशोभं वीक्षितुं क्षितितलं क्षितिपोपि ॥ ८३ ॥

पूर्ववत्क्षितिपतौ कनकेन गौरवं प्रकुपिताप्यकृतासौ ।
वीक्षितुं च शरदं सह देव्या सौधमग्रमतलं प्रतिपेदे ॥ ८४ ॥

शारदीं कुसुमवैभवलक्ष्मीं यावदत्र नृपतिः सह देव्या ।
तावदेत्य विदितो नतिपूर्वं चण्डकर्मपुरुषः समवोचत् ॥ ८५ ॥

द्वारि देव परदारनिषेवी कोपि तिष्ठति पुमान् दृढबद्धः ।
तस्य दोषसदृशं वद दण्डमित्युदीर्य विरराम तलारः ॥ ८६ ॥

तन्निशम्य कुपितो नरनाथश्चण्डकर्मपुरुषं समवोचत् ।
क्षिप्रमेनमधिरोहय शूलं वार्तया किमिह दापयतां नः ॥ ८७ ॥

देव किंकृतमनेन यतोऽयं वध्यतेति तरुणोपि वराकः ।
तन्निशम्य वचनं निजपत्न्या नीतिवानिति जगाद नरेन्द्रः ॥ ८८ ॥

एष देवि परदारनिषेवी वध्य एव हि विचित्रवधेन ।
सा नरेश्वरमवोचत दोषः कोऽपि किं परवधूहरणेऽस्ति ॥ ८९ ॥

निग्रमुखनलानलनाकं प्राप्नलश्च गिलमश्च ममश्च ।
दुर्जनस्य गच्छन गमयन नीतमकृतगमयेन ममागम् ॥ ६४ ॥
सर्विज्ञानत त्यागमयण सोऽपि नायकगणो गिरगाज ।
स्फटीलमग भूतलकागां मालतीमुमनसा प्रकरो या ॥ ६५ ॥
सान्द्रमकरनमम निनिदन् गात्रमानमिम लोकमनोरम् ।
मार्गणानिव विशुद्धिममनभष्टमा निजकरान विमसर्ज ॥ ६६
केतकीकुसुमकम्पनपाण्डुपान्थया नवलगन मकलावाः ।
मन्दमन्दमृदितकृतिनागुरुपणश्रियमुवाह निशायाः ॥ ६७ ॥
ज्योत्स्नयान्ति चपले भुवनान्ते प्राणिनोऽप्रगतिनिजदूतीम् ।
सा विभूषणमिषण मृगाक्षी ता निनाय नगनाथनिकेतम् ॥ ६८ ॥
चाटुभि मणिकामयवोभिस्ता नथा ममनुनीय स रेमे ।
जातमस्य च यथा चरितार्थं यौवनं च मदनो विभवश्च ॥ ६९ ॥
लोचनान्तकनिरीक्षणमन्तः कूजितं च हसितं च तदस्याः ।
घुम्बितश्च विनुतश्च रतश्च व्याजहार सुरतोत्सवरागम् ॥ ७० ॥
गीतनृत्यपरिहासकथार्थैर्दीर्घिकाजलवनान्तविहारै ।
तत्र तां रतिसुखार्णवमग्नां अप्रतुर्न समय समतीतम् ॥ ७१ ॥
सौविदल्लवचनादथ वार्ता ता निशम्य नृपहेमरथोऽपि ।
वल्लभास्मरणजादतिदु खादमन्मथग्रहवशादिवशोऽभूत् ॥ ७२ ॥
शून्यमेव हसतिस्म स मोहं यात्यकारणमुपैति च गेहात् ।
कण्ठपीठविलुठद्घनवाष्पं हा प्रियेति दयिते च रुरोद ॥ ७३ ॥
कामदुर्दमपिशाचवशेन भ्रष्टराज्यविभवः स धरित्र्याम् ।
हा प्रियेति कृततारविरावं भ्राम्यतिस्म शिशुभिः परिवीतः ॥ ७४ ॥
धूलिधूसरशिरोरुहगात्रः स्कंधलम्बितपटच्चरकन्थः ।
यम्भ्रमन्प्रतिपुरं प्रतिरथ्यं कोशलं प्रति जगाम स दैवात् ॥ ७५ ॥
तत्र वल्लभतमाह्वयमुच्चैरुच्चरन्तु जनं समधावत् ।
धावमानमवलोक्य तथा तं धात्रिका सुचहुदु खमरोदीत् ॥ ७६ ॥

बाष्पपूर्णनयनान्तमकाण्डे तां विलोक्य रुदतीं समपृच्छत् ।
वल्लभा नृपतिहेमरथस्य रुदतेऽस्य किमकारणमेव ॥ ७७ ॥
सा तदा प्रहृदयनाथ कथञ्चिद्गद्गदस्वरमचीकथदेवम् ।
त्वद्वियोगजनितं दुरवस्थं वीक्ष्य पुत्रि रुदितं तव भर्तुः ॥ ७८ ॥
धातृकावचनमश्रुतपूर्वं सा निशम्य सहसैव चुकोप ।
युज्यतेऽस्य कटुकं तव वक्तुमीदृशं मम सुदुःखविधायि ॥ ७९ ॥
पार्वणेन्दुवदनस्सरलाक्षो दीर्घपीवरभुजो मम भर्ता ।
यत्पदाम्बुजरजोऽपि नरेन्द्रैरुह्यते स्रगिव मूर्द्धभिरुच्चैः ॥ ८० ॥
रूपनिर्जितमनोभवकीर्तिस्तस्य किं वद नृपस्य वदेयम् ।
इत्युदीरितवती निजपुत्रीं प्रत्यवोचत तदा किल धात्री ॥ ८१ ॥
लक्षणानि च गतिं च वचांसि पुत्रि सम्यगिह रूपय तावत् ।
तन्निरूप्य च तथेति विदित्वा सा निजं प्रियतमं विषसाद ॥ ८२ ॥
यावदास्त विनिगूढविषादं सात्मसौधशिखरे सह धात्र्या ।
तावदाप शरदाहितशोभं वीक्षितुं क्षितितलं क्षितिपोऽपि ॥ ८३ ॥
पूर्वपश्चिमतिपतौ कृतकेन गौरवं प्रकुपिताप्यकृतार्था ।
वीक्षितुं च शरदं सह देव्या सौधमग्रतलं प्रतिपेदे ॥ ८४ ॥
शारदीं सुखमयं क्षत लक्ष्मीं यावदत्र नृपति सह देव्या ।
तावदेत्य विदितो नतिपूर्वं चण्डकर्मपुरुषः समवोचत् ॥ ८५ ॥
द्वारि देव परदारनिषेवी कोऽपि तिष्ठति पुमान् दृढबद्धः ।
तस्य दोषसदृशं वद दण्डमित्युदीर्य विरराम तलारः ॥ ८६ ॥
तन्निशम्य कुपितो नरनाथश्चण्डकर्मपुरुषं समवोचत् ।
क्षिप्रमेनमधिरोहय शूलं वार्तया किमिह दापयतो मः ॥ ८७ ॥
देव किं फलमनेन यतोऽयं वध्यतेति तरुणोऽपि वराकः ।
तन्निशम्य वचनं निजपत्न्या नीतिवानिति जगाद नरेन्द्रः ॥ ८८ ॥
एष देवि परदारनिषेवी वध्य एव हि विचित्रवधेन ।
सा नरेश्वरमवोचत दोषः कोऽपि किं परवधूहरणेऽस्ति ॥ ८९ ॥

तं निशम्य दुरयापमपुण्यै-
    राजवंशपदमारमवेत्य ।
सन्निवेश्य च सुतं निजराज्ये
    शिश्रिये स पदवीं श्रमणानाम् ॥ १०२ ॥

कैटभस्तदनुजः प्रियधर्मः
    प्रेयसी मधुनृपस्य च पत्नी ।
इन्दुदीप्तिसहिता परपक्षा
    शिश्रियुः श्रमणतामथ सर्वे ॥ १०३ ॥

उग्रमुग्रतपसाचिरकालं
    शास्त्रसागरतटं परमाप्ताः ।
ते समाधिमृतयः समभूव-
    न्नच्युते दिवि सुराः सममेव ॥ १०४ ॥

इन्दुदीप्तिरदयात्मलिनस्य
    कर्मणस्त्रिदशतामपहाय ।
राजताद्रिगिरिपत्तनराजः
    सम्बभूव तनया हरिनाम्नः ॥ १०५ ॥

अच्युते त्रिदशतां दिवि लब्ध्वा
    पूर्वजन्ममधुभूपकलत्रम् ।
उत्तरेत्र रजताचलभागे
    तत्खगेश्वरसुताजनि साध्वी ॥ १०६ ॥

अच्युते दिवि सुखान्यनुभूय
    पूर्वजन्ममधुभूपचरो यः ।
रुक्मिणीतनुभुवः मदनोऽसौ
    द्वारिकापुरि हरेस्तनयोऽभूत् ॥ १०७ ॥

यस्तु कैटभचरस्त्रिदशोऽभू-
    न्नच्युते तदनुजः पुरुपुण्यात् ।

तं निशम्य दुरवापमपुण्यै-
र्वज्रसंयममपारमवेत्य ।
सन्निवेश्य च सुतं निजराज्ये
शिश्रिये स पदवीं श्रमणानाम् ॥ १०२ ॥

कैटभस्तदनुजः प्रियधर्मः
प्रेयसी मधुनृपस्य च पत्नी ।
इन्दुदीप्तिसहिता परपक्षा
शिश्रियुः श्रमणतामथ सर्वे ॥ १०३ ॥

उग्रतप्ततपसश्चिरकालं
शास्त्रसागरतटं परमाप्ताः ।
ते समाधिमृतयः समभूव-
न्नच्युते दिवि सुराः सममेव ॥ १०४ ॥

इन्दुदीप्तिरुदयागमलिनस्य
कर्मणश्चिरतनामपहाय ।
राजताद्रिगिरिपत्तनराज्ञः
स्तस्यभूय तनया हरिमालः ॥ १०५ ॥

अच्युते चिरमतो दिवि लब्ध्वा
पूर्वजन्ममनुभूपफलम्भम् ।
उत्तरेव रजताचलभागे
तारकेश्वरसुताजनि साध्वी ॥ १०६ ॥

अच्युते दिवि सुखान्यनुभूय
पूर्वजन्ममनुभूपवरो यः ।
हरिमतीतनुभुवो मदनोऽस्याः
प्राविकापुरि हरेश्वनदोऽभूत् ॥ १०७ ॥

यत्तु कैटभचरस्त्रिदशोऽभू-
दच्युते तदनुजः सुरपुण्यात् ।

अष्टमः सर्गः ।

अथ कालसम्बरखगेन्द्रगृहे
जननेत्रकैरवविकाशयिता ।
अजनयत्प्रमोदमधिकं जगतो
ववृधे स बालकविधुः शनकैः ॥ १ ॥

परिरक्षया खगपतेः सुकृती
मदनोऽभिवृद्धिमुपयाति यथा ।
समुपागमप्रमितदानुगुणः
समसेव सम्पदखिलापि तथा ॥ २ ॥

समवाप्य जन्मकुलरत्ननिधौ
ललितं च शैशवमतीत्य शनैः ।
सकलाः क्रमात्समधिगम्य कलाः
समवाप यौवनमनङ्गवाटी ॥ ३ ॥

सहसास्य साहसमसमीक्ष्य तदा
जनकं प्रतीपुरस्य ये कुपिताः ।
बलगर्विताः समरलब्धजयाः
स जिगाय खेचरपतीन्कुपितान् ॥ ४ ॥

विविधोच्छ्रितध्वजवितानगर्भः
पिहिताहिमद्युतिकरं नगरम् ।
समुपेयिवान्मनसिजो विजयी
त्रिदशाधिनाथ इव देवपुरम् ॥ ५ ॥

जयभूषितं समवलोक्य सुतं
तनयं परं स परिहृष्टमनाः ।

अष्टमः सर्गः ।

प्रविलोक्य गोपुरमथास्य तदा
पदनिस्त्र तान्कुलिशाङ्कुशगः ।
अनुजाः सदा वदति खेटजनो
विशतीह यः स बलवान्पुरुषः ॥ १३ ॥

तदहं विशामि भवतां पुरतो
गुरुगोपुरं स्मरराजसुते ।
इति वाचमस्य विनिशम्य तदा
द्रुतमाददीह मदनो कुटिलः ॥ १४ ॥

अविकारा तत्र च न धैर्यनिधिः
क्षणमास्त यावदतिरन्यनमे ।
आपदोपमर्दभयकोपभरा—
स्सहसाविरास भयदो भुजगः ॥ १५ ॥

न जगौ च तं किमु मदीयपदे
कृतवान्पदं खल नराधम रे ।
इति तर्जयन्नुरगाभिरतां
चपले मुमुक्षुरभिधाममहिः ॥ १६

भृकुटीकरालितमत्सरतदं
रभसा विजित्य युधि तं मदनः ।
सततं मौलिकुरुमल्लितहस्तयुगं
समपूजयदेवमिदं कथ्यमहे ॥ १७

भुजगो जगाद मुदितो मदनं
पृथुगोपुरे सुचिरकालमहम् ।
स्थितिमातनोमिह हि नाथ यथा
कथयामि ते सकलमेव तथा ॥ १

अलकाभिधं पुरमिदास्ति गिरौ
... म् ।

स चकार राज्यमनुजानुमतः
समये नमेः पुनरपीह नृपः ।
मुनितां यियासुमथ मन्त्रगण—
स्तमुवाच नः कथय नाथ विभुम् ॥ २६ ॥

इति मन्त्रसार्थवचनान्मुदितः
प्रणिपत्य तीर्थकृतमाह नमिम् ।
विमलावबोध जगदेकपते
भवितास्य कः पतिरमेयगुणः ॥ २७ ॥

हरिवंशनेमिजिनतीर्थभव—
स्तनयो हरेर्मकरसिन्धोरस्य पतिः ।
भवतेति जैनमवधार्य वचः
खचराधिपश्च तमवोचदिदम् ॥ २८ ॥

मणिगोपुराक्रमणगर्वभृतो
मम तस्य मन्त्रगण सेवयिता ।
इह रक्षणेऽस्य च नियोज्य स मां
मुनितामवाप्य च जगाम शिवम् ॥ २९ ॥

परिपाल्य मन्त्रगणकोशमिमं
स्थितवाननेहसमियन्तमहम् ।
अधुना समर्प्य तव तं विधिना
समभूदयं जन इहातिकृती ॥ ३० ॥

मुकुटं वितीर्य मणिरत्नचितं
समुवाच गोपुरपतिर्मदनम् ।
कथितस्तदेव नमितीर्थकृता
तव किङ्करोऽस्मि वद किं करवै ॥ ३१ ॥

इति तं विलोक्य खचरेन्द्रसुताः
फणिना वितीर्य मुकुटं चकिताः ।

[illegible]

इति तर्जितस्तदपि तेन मदा
 चपलेन पञ्चविशिखोऽपि युधि ॥ ५१ ॥
प्रमजातमन्ततमथापजयं
 खचराधिपस्य तनयः सहसा ।
युधि तं विजित्य समवाप्य ततो
 मकरध्वजं मकरकेतुरभूत् ॥ ५२ ॥
द्रुतमुत्थितानमथ कुण्डममुं
 स्मरमाहृतं समुपनीय जगुः ।
विशतीह यः स खलु वीरपति-
 र्लभते यथाभिलषितं च नरः ॥ ५३ ॥
पवनं प्रपद्य स तथेत्यचिरा-
 द्विरराजगुरुसिमपाम्भवः ।
अतितीव्रदीप्तिनिवहेन जग-
 त्परिरम्भमुद्यतमिव ज्वलितम् ॥ ५४ ॥
हुतभुक्शिखाभिरभिलीढवपुः
 स यथापयिष्य ददृशे शमनः ।
प्रहतिक्रियातमुरसः प्रणता-
 च्छिखिधौतवस्त्रयुगमाप परम् ॥ ५५ ॥
अथ मेषपर्वतमितिप्रथितं
 समयोपनीय जगदुः कुटिलाः ।
अनयोर्य एति विवरं स जयी
 लभते च लाभमिति वृद्धवचः ॥ ५६ ॥
स विलाभ्य कर्णयुगेन गिरी
 प्रविवेश तत्र समयानुमतः ।
विजितेन मेषविबुधेन मदा
 समदायि कुण्डलयुगं रुचिरम् ॥ ५७ ॥

गदितं च नूनमिह संविदानां
जगदाधिपत्यमपि हस्तगतम् ॥ ६४ ॥

विषमेषुरत्र किल तद्वचना—
द्विदितिस्म यावदुरुधैर्यनिधिः ।
चलदञ्जनाचलनिभो दपितः
सहसा दधाव तमभि द्विरदः ॥ ६५ ॥

शरणान्तरे करपुरो रदयो—
र्विचरंश्चकार विमदं स गजम् ।
स च तं जगाद नतिपूर्वमिदं
तव काम कामदगजोऽस्मि सदा ॥ ६६ ॥

अथ साहसैकरसिकः सह तै—
र्नु यामनूरमगमत्स युवा ।
उप तामगम्य जगदुः खचराः
स नृपोऽप्यदः समधिरोहति यः ॥ ६७ ॥

स तदा प्रधाव्य च तमाक्रमते
निजयामपाद्दतिकोपवशात् ।
भुजगाकृतिस्तमसुरोऽभ्यगम—
द्विजितः स पुष्पधनुषापि रणे ॥ ६८ ॥

छुरिकाप्यरत्नकवचानि तदा
चरमुद्रिकामपि मतः स ददौ ।
विलसन्समुग्धवदनः सह तैः
स ततः सरावनिभमद्रिमगात् ॥ ६९ ॥

समुपेत्ति योऽस्य शिखरं स पति—
र्भविता श्रियः खचरचाप्यमरः ।
समरोहर्दनमथ सोऽपि तदा
विजितश्च बाहुयुधि तेन सुरः ॥ ७० ॥

गरुडकिङ्कराक्षरयुगं परमं
कटकद्वयं स कटिसूत्रमतः ।
समवाप्य पञ्चगिरिशास्तोपि ततः
समगाद्गुहामनु वराहगिरेः ॥ ७१ ॥

स निवेश तां कृतसम्भ्रमया
तनुसम्प्रवेशन पराक्रमुख ।
समरे स तेन निर्जितश्च ततः
जयघोषशङ्खसुमनोधनुर्वा ॥ ७२ ॥

क्षणतः पयोधनमवाप्य कृती
स्वकरं मनोजयमितिप्रथितम् ।
छलतो घनंतकरणेन दृढ
स ददर्श तत्र सितसैकसरी ॥ ७३ ॥

महता विपत्सु विहितोपहति-
र्यशसे भवेदिति नृपाङ्गभुवा ।
स विपाशितश्च नरसेव यया
उपकारिणं च विनियम्य ततः ॥ ७४ ॥

रिपुरेष देव मम दुष्टमनाः
परिभूय मामिति गतस्त्वरया ।
तदहं भवन्तमुपकारपरं
गतवांक्षणादपरिभाव्य विभोः ॥ ७५ ॥

तव किङ्करोस्मि वद किंकरवा—
णिति सन्निगद्य मदनाय ददौ ।
शुभविद्ययोर्द्वितयमिद्धरुचि
बहुमूल्यहारमपि खेटपतिः ॥ ७६ ॥

सुरजालमप्युदितचित्रतरं
सहितां तयोरपि विधाय परम् ।

नयचैयघनां स्वगवसंनमुतां
समवाप पञ्चविशिखोपि तदा ॥ ७७ ॥
जननान्तरोपचितपुण्ययशा—
दुपलब्धलाभमवगम्य खलाः ।
तमनन्तथापि शठभावरताः
समनंपुरर्जुनयनं भयदम् ॥ ७८ ॥
समुपैति यो वनमिदं विभयो
लभते स लाभमिति ते न्यगदन् ।
विजितश्च तत्र दनुजः समदान्
सुमनोधनुः सह शरैस्तनोः ॥ ७९ ॥
मदतापशोषणविमोहकरान्
समवाप्य पुष्पविशिखान्विषमान् ।
जनताविलोचनमनोमदना—
न्नितरां मदादि समभून्मदनः ॥ ८० ॥
शुभभोगिरूपसुरभीमगुहां
विषमेषुणा समययुः खचराः ।
समितौ विजित्य जयमाप ततः
कुसुमातपत्रशयने स जयी ॥ ८१ ॥
स ततो मजन्धिपुन्नागवने
निकषा समुन्नतजयंतगिरिम् ।
नवपल्लवाचितनमालतले
गिरिवाहिनीमनु शिलाफलके ॥ ८२ ॥
विहितासनां स्थिरसमाधिहते
निजनासिकाहितविलोलदृशाम् ।
नखनाग्रदीप्रपरिपाटलित—
स्फटिकाक्षसूत्रवलयं दधतीम् ॥ ८३ ॥

---

१ असुरः ।

सितधौतचीनपरिधानवतीं
श्लथकेशपाशपिहितांसयुगाम् ।
सुमसौरभाहृतषडङ्घ्रिकुलं—
द्रगमेय्यमानवदनाम्बुरुहम् ॥ ८४ ॥

परिणाहिपीनकुचभारनतां
जघनालसां जितमरालगतिम् ।
कलवल्लकीमधुरनादरवां
चलनीलवारिजविलोलदृशाम् ॥ ८५ ॥

निजरूपयौवनकलाविभवै—
स्तरुणीं तृणीकृतजगत्त्रितयाम् ।
स विलोक्य विस्मयमवाप्य पुनः
परिचिन्तयामिति बभूव युवा ॥८६॥ कुलकम्

सवितुः प्रभा किमुत शक्रवधू
रजनीकरस्य किमु कान्तिरसौ ।
मकरध्वजस्य रमणी किमियं
भुवमागता ननु कुतोपि भवेत् ॥ ८७ ॥

सकलाकलाद्दयविधौ क विधे—
र्जडता क सर्वसुभगा तरुणी ।
मदनो ध्रुवं त्रिनयनाग्निभया—
दसुरक्षणाय रमणीत्वमगात् ॥ ८८ ॥

उदवासतश्चिरमुपार्य तपो
नलिनं सुकुमारतरं सुदृशः ।
कथमप्यगाच्चरणयोरुपमां
परितर्कये नियतमेवमहम् ॥ ८९ ॥

इह कान्तिभाजि कथयोपरता—
मिह भव्यतापि जगतां विरता ।

इह सुन्दरीलवणिमा वसति
इह मुद्रितश्च महिलामहिमा ॥ ९० ॥

भुवनत्रयप्रथितरूपगुणां
युवतीं स्थितां समभिभूय तराम् ।
स विलोक्य तां मदयिता जगतां
परमुन्मनाः समभवन्मदनः ॥ ९१ ॥

अथ तत्क्षणादुपगतं त्रिदशं
विदितं वसंतकमपृच्छदसौ ।
किमु भीषणे स्थिरसमाधिरता
तरुणी वने वसति कस्य सुता ॥ ९२ ॥

स जगौ प्रभञ्जनजयोऽस्ति नृपो
दयितास्य वागिति तयोस्तनया ।
रतिनायिका कुसुमकेतुकृते
वनमाश्रिता तपति तीव्रतपः ॥ ९३ ॥

अपदानकर्मभिरतिप्रथितैः
स च देव सर्वविदितस्त्वमसौ ।
अनुरूपसंगमविधानतया
सफलश्रमो भवतु विश्वसृजः ॥ ९४ ॥

इति पेशलं वचनमस्य तदा
विनिशम्य पुष्पधनुषा विधिवत् ।
सहसा कृतोपकरणः सरसं
रतिपाणिपीडनविधिर्विदधे ॥ ९५ ॥

सकटाक्षलास्यसुरवारप्रणता—
सुरकामधेनुमथ पुष्परथम् ।
स वसंतसङ्गतमवाप्य कृती
निजलीलया निरगमात्स वनात् ॥ ९६ ॥

रतिसंगुनस्य मदनस्य रथा—
स्फुरतो दधानुरतिदीनमुखाः ।
विदुषां पदस्य इव ते प्रकटं
सुरनाकृयस्यनुचरा रिपवः ॥ ९७ ॥

इति षोडशाग्रपरलाममुनं
मदनं विशन्तमथ गस्य पुरे ।
अतिकौतुकात्स्मरललोलदृशः
पिदधुर्गवाक्षपदवीं वदनैः ॥ ९८ ॥

नृपवीथिसौधनवलक्ष्यनखं
प्रथितस्य तस्य पुरपरा वनिताः ।
स्मररूपदर्शनविलोलदृशः
सहसा परस्परनिपीडनतः ॥ ९९ ॥

श्लथकेशपाशपिहिताम्रदिशं
किमु तिष्ठसि प्रसृतबाहुयुगा ।
पुरतोऽपगच्छ मम देहि पदं
इति तत्र काचन जगाद परम् ॥ १०० ॥

सखि दृश्यते कुसुमचापभृतो
भयमाभृतं यदि न रूपमिदम् ।
नयनद्वयं विफलमेव भवे—
त्खलु दृश्यदर्शनममुष्य फलम् ॥ १०१ ॥

निबिडोरुपीवरनितम्बभरा—
त्सहसा प्रयातुमसहामपरा ।
मकरध्वजेक्षणसमुत्कदृशं
स्वयमुत्सुका प्रियसखीमवदत् ॥ १०२ ॥

परमाणवोपि खलु ते सुभगा
वपुरस्य यैः कृतमनन्यसमम् ।

ननु पूर्वजन्मनि तवैष कृतं
सुकृतं यथायमुदरेण धृतः ॥ १०३ ॥

रतिकामयोर्युगमभूष्म परं
विपर्यीकृतं तदधुनाऽऽत्मदृशा ।
दयितेयमत्र खलु पुण्यवती
सखि चास्य निर्वृतिकरी भविता ॥ १०४ ॥

शिथिलाम्बराहितकराः सुदृशः
श्लथकुन्तलामविगलत्कुसुमाः ।
कुचमण्डलात्रुटितहारलता
मदनं दधावुरवलोकयितुम् ॥ १०५ ॥

कटकं श्रुतिप्रणयिहारलतां
कटिसूत्रधामनि चकार परा ।
अथवा विमोदयति पञ्चशरे
न हि वेत्ति काचिदपि योग्यपदम् ॥ १०६ ॥

समयं विलङ्घ्य परिपन्थ्य तथा
सितपुष्पसायकशरं क्षतया ।
सुदृशा कयाचिदपि पञ्चशरे
प्रकटीभवत्कुचमयेऽधि कचः ॥ १०७ ॥

इति वस्तुवादिनि पुरन्ध्रिजने
नवकामदर्शनपिशाचधरे ।
विदधाति चेष्टितमनेकविधं
प्रविवेश वेश्म नृपतेर्मदनः ॥ १०८ ॥

अनुपकेलिपानपिहिताखिलमुखं
नमतिस्म पुष्पविशिखः पितरम् ।
स च तं तदा विजयिनं मुदितः
परिरभ्य मूर्धनि चुचुम्ब नृपः ॥ १०९ ॥

तदनन्तरं च जनकानुमतो
नयवाञ्जगाम जननीनिलये ।
नतमौलिचुम्बितपदाम्बुरुहं
विनयात्प्रणम्य निषसाद पुरः ॥ ११० ॥

विनतस्य तस्य च वितीर्य मुदा
जननी समाशिषमवेक्षत तम् ।
नवयौवनं सकलललामयुतं
धवलीकृतत्रिभुवनं यशसा ॥ १११ ॥

मृदुभङ्गुरायतसुनीलकचं
धवलायतासितविलोलदृशम् ।
विधुबिम्बकान्तवदनं सुभगं
पृथुवक्षसा विजितमेरुतटम् ॥ ११२ ॥

मृगराजमध्यमिभनाथगतिं
कनकावदातवपुषं गुणिनाम् ।
सकलोपमाननिचयेन कृतं
विधिना ध्रुवं सुभगमस्य वपुः ॥ ११३ ॥

इति यावदस्य विकसन्नयनं
वपुरीक्षते हृतमनोनयना ।
अथ मर्मभेदिभिरनंगशरैः
हृदि ताडिता खचरराजवधूः ॥ ११४ ॥

हिमलङ्घिताम्बुरुहदीनमुखा
विरहानलेन परितप्ततनुः ।
करपल्लवार्पितकपोलतला
गलिताश्रु शोचितुमुपक्रमते ॥ ११५ ॥

नवयौवनं लवणिमानुगतं
सकलाकला निरुपमो विभवः ।

विफलं भवेन्मम समस्तमिदं
    यदि सेव्यते न हि प्रिया सुभगः ॥ ११६ ॥

मुखपङ्कजं मुखसुगन्धि यया
    न हि पीयतेऽस्य सरसं सुदृशा ।
अथ हन्ति या प्रणयकोपवशा—
    दवतंसकैर्न च न तं प्रमदा ॥ ११७ ॥

कृतगोत्रभेदविवशं रमणं
    कुपिता नियम्य सिचयेन दृढम् ।
श्रवणोत्पलेन चरणाभिमुखं
    परिताड्य रोदिति न या सुचिरम् ॥ ११८ ॥

प्रमदा न सा सुभगता वसति—
    र्न चकास्ति सा बहुपुरन्ध्रिजनैः ।
इति तावदुत्सुकमनाः खचरी
    सुचिरं विचिन्तयति कर्मवशात् ॥ ११९ ॥

मदनोऽपि तच्चरणपङ्करुहं
    प्रणिपत्य तावदतिमुग्धमनाः ।
मुदितस्तदीयममता सहितो
    निजसौधमुच्छ्रितपताकमगात् ॥ १२० ॥

निजधाम राजतनयेऽथ गते
    स्मरतापकैः हृतसमस्ततनुः ।
विरहव्यथां न हि विषोढुमलं
विगतत्रपा कृतविकारभरम् ॥ १२१ ॥

    प्रविलोकते कुचतटं विवशा
बहु जृम्भते शिथिलकेशचया ।
    सहसा विभूषणमपास्य च या
स्वमपी विनिन्दति विषिण्णमनाः ॥ १२२ ॥

कुरुषे न चेत्सुभग नूनमियं
रमणीहतिस्तव भवेद्विषमा ॥ १२९ ॥

उभयत्र निन्द्यमिति तद्वचनं
स निशम्य कम्पितशिरो जगदे ।
अपि नैव चिन्त्यमिदमस्य भवे—
दभिभूयते किमु कुलप्रभवैः ॥ १३० ॥

विषयादितोऽस्य विनिवार्य मनो
यदासे यतस्य कुलमार्गरता ।
इति मातरं समभिधाय मुहु—
र्जिनमन्दिरं मकरकेतुरगात् ॥ १३१ ॥

सकलश्रुताम्बुनिधिपारमितं
वरनागरेन्द्रमभिधया प्रथितम् ।
स ददर्श तत्र मुनिमङ्कुलं
परमार्थवीक्षणमपास्ततमम् ॥ १३२ ॥

प्रणतिं विधाय च निषद्य पुरः
समवाप्य शान्तमुदारवचाः ।
स जगाद गोप्यमपि मातृमनः
सविकारमात्मनि मुनेः शान्तकः ॥ १३३ ॥

समुपाद्य तं यतिपतिर्मधुना
भवतेयमन्यजननेऽपहृता ।
शशिरोचिरित्यभिधया प्रथिता
तपसा च तेन समवाप दिवम् ॥ १३४ ॥

अनुभूय तत्र च सुखं सुचिरं
क्षितिसंचरस्य विजयार्द्धगिरौ ।
अवरोधरत्नमभवद्दयिता
कनकप्रभेत्यभिधयानुगता ॥ १३५ ॥

स्फटिकाम्बुनिर्मलतमेऽन्दतले
　　निजरूपदर्शनपरासमुदा ॥ १४२ ॥

कृतमासपारणमपारगुणं
　　मलदिग्धकायमकषायमुनिम् ।
गृहमागतं प्रवरपिण्डकृते
　　मुकुरप्रबिम्बितमपश्यदसौ ॥ १४३ ॥

विमलावधिं विजितकामरिपुं
　　प्रतिबिम्बितं तमवलोक्य तदा ।
कुपिता विनिन्द्य बहुधा कलिलं
　　समुपार्ज्य कुष्ठिततनुः समभूत् ॥ १४४ ॥

गुरुकुष्ठतः कुथितदिव्यवपुः
　　प्रविवेश सप्तमदिने दहने ।
बहुधार्तचिन्तनपरा विपदा
　　मृतिमाप्य निन्दितखरी समभूत् ॥ १४५ ॥

मृदसूकरी तदनु सा च मृता
　　गुरुदुःखतः समभवच्च शुनी ।
श्रुतमोहतो ज्वलनमेत्य तदाऽ
　　मृत सातिदुःखितवपुः क्षणतः ॥ १४६ ॥

निगमे च मेघपदपूर्वपदे
　　समभूच्च धीवरकुले तनया ।
अतिपूतिगन्धिरभवद् दुरितै—
　　र्निजगन्धतः परिहृता स्वजनैः ॥ १४७ ॥

सुरनिम्नगातटवटस्य तले
　　कृतजीर्णपर्णतरलप्रगृहे ।
उडुपेन तारिततितीर्षुजना
　　पितृपोषणेति निपुणास्त च सा ॥ १४८ ॥

इति साश्रुलोचनमिमां वदतीं
यतिराट् साध्वि भव धीरमतिः ॥ १५५ ॥

निजकर्मणामिह सदा यदाग—
स्तनुमान्यदा भवति पुत्रि तदा ।
किमु शोच्यते त्वमधुना नु शुभे
शुद्धिधर्ममेव हि विधेहि परम् ॥ १५६ ॥

जिनमार्गसाधुषु कृतापकृतेः
फलमित्यवेत्य भव शान्तमनाः ।
इति तां विनीय स जगाम यतिः
नगरं च कोशलमथापदियम् ॥ १५७ ॥

नगरे च तत्र जिनमार्गरतां
विधवेष्वसकृद्दयां परमाम् ।
गणिनीमवाप्य चिरकालमसौ
विधिना निनाय गृहधर्मरता ॥ १५८ ॥

विविधैस्तपोभिरतिघोरतरै—
स्तनुतां गता च धरराजगृहम् ।
अपि तद्धराधरगुहाविवरे
मृतिमाप्य षोडशदिवं समगात् ॥ १५९ ॥

त्रिदशाधिपस्य रमणीत्यमिय
समवाप तत्र पुरुपुण्यवशात् ।
चिरकालतश्च्यवनमेत्य ततः
समभूच्च कुण्डिनपतेर्दुहिता ॥ १६० ॥

वररुक्मिणीत्यभिधया प्रथिता
दमघोषजाय च सजातिरदात् ।
सहसानुरक्तहृदयाय ततो
हरिणा हृता युधि निहत्य रिपून् ॥ १६१ ॥

स्वमवेत्य वञ्चितमथास्य सुता
  समचिन्तयद् द्रुतमपायममुम् ॥ १६८ ॥

करजैर्विदार्य कुचकण्ठकरा—
  नयनाम्बुधौतगुरुहारलता ।
अतिदुःखिता किल निकारवशा—
  द्रुदतिस्म सा पतिमुपेत्य रुषा ॥ १६९ ॥

परिपालनाय भवतैव वने
  शिशुरर्पितः करुणया मम यः ।
विहितस्तवैव च सुखेदापदे
  प्रविलोकतास्य करणीयमदः ॥ १७० ॥

कुलमस्य वेद्मलमस्ति विभो
  किमपास्यतेऽपि धनमेव जनैः ।
तव पुण्यतश्च निजशीलमिदं
  परिरक्षितं कथमपीह विभो ॥ १७१ ॥

मम जीवितेन किमु नाथ परं
  तव शुद्धवंशमलमूतनमोः ।
यदि चौस्यतेस्य न शिरःकमलं
  रुधिरारुणं धरणिपीठतले ॥ १७२ ॥

इति वल्लभोक्तमवधार्य नृप—
  स्तनयाग्रखण्डममनो निभृतम् ।
निजगाद दुष्टतमकाममुं
  नयताऽविचारमधुना निधनम् ॥ १७३ ॥

समचिन्तयंस्तदपि चापचितं
  मुदितान्तरेति सहसैव खलाः।
जनतापवादचकिताश्च ततः
  पृथुवापिकामनु विनिन्युरमुम् ॥ १७४ ॥

करटीन्द्रगर्जितघनुर्ध्वनिभि—
    र्हयहेषितैश्चरणतूर्यरवैः ।
व्यथयंश्च कर्णविवराणि भृशं
    नृपतिः क्रुधास्य सविधं समगात् ॥ १८१ ॥

मदनोऽपि तद्रिपुबलं निकटे
    समवेक्ष्य सस्मितमुखाम्बुरुहः ।
प्रविधाय सैन्यमरिचक्रसमं
    निजविद्यया समचलच्च रुषा ॥ १८२ ॥

तुरगा हयान् गजघटांश्च घटा
    रथिनश्च दुर्दममहारथिकान् ।
समगुः क्रुधा युधि भटांश्च भटा
    इति सेनयोः सममभयत्समरः ॥ १८३ ॥

पतितैर्गजैस्तुरगिभिश्च हतैः
    परिते रथैर्विहतसूतहयैः ।
अतिभीषणं समवलोक्य युधं
    नटतिस्म खे सुरमुनिर्मुदितः ॥ १८४ ॥

अथ कालसम्बरबलेन निजं
    मकरध्वजो जितमवेक्ष्य बलम् ।
चलदुग्रमाचलनिभैर्द्विरदै
    रभसा चचाल चलयन्धरणीम् ॥ १८५ ॥

वीरैः सयोधैः पातिता योधमुख्याः
    स्पृष्टाः पृष्ठाधिः सादिनः सादिताश्च ।
नागैर्नागेन्द्रा वीरभूपैश्च भूपाः
    सर्वे सोढौघा मायया सम्प्रमुग्ध ॥ १८६ ॥

विध्वं सैन्यं पातितं स्वं निरीक्ष्य
    युद्धायाति दुर्जयस्तं पुरस्तात् ।

पित्रे भार्यां याचितुं खेचरेन्द्रः
प्रज्ञप्त्याख्यां रोहिणीमप्ययासीत् ॥ १८७ ॥

[illegible] मां न मुग्धः
[illegible] शीघ्र मम [illegible] ।
[illegible]
[illegible] ॥ १८८ ॥

[illegible]
[illegible] ।
[illegible]
[illegible] ॥ १८९ ॥

[illegible]
शीघ्र [illegible] ।
[illegible]
[illegible] ॥ १९० ॥

[illegible]
[illegible] ।
[illegible]
[illegible] ॥ १९१ ॥

[illegible]
[illegible] ।
[illegible]
[illegible] ॥ १९२ ॥

[illegible]
[illegible] ।
[illegible]
[illegible] ॥ १९३ ॥

चञ्चलाचलसमृद्धिजीवितं
वल्लभं पितरमात्मजं गुरुम् ।
मृत्युमानयति दुष्टकामिनी
कोपितान्यमनुजे नु का कथा ॥ १९४ ॥

विष्णुः श्रीहरिवंशभूषणमणिश्चक्राङ्कलक्ष्मीपति-
र्दैत्यारातिवधूमुखाम्बुजविधुः कल्पद्रुमो योऽर्थिनाम् ।
कीर्तिव्याप्तजगत्त्रयश्च जनकः ख्यातत्रिखण्डाधिपो
भर्तुः प्राणगरीयसी गुणपरं माता च ते रुक्मिणी ॥ १९५ ॥

सत्यया सह सपत्निविरोधो
मातुरस्ति तव पुत्र नितान्तम् ।
अन्यथादिति निशम्य मुनेः स्वं
तोषमापदधिकं विषमेषुः ॥ १९६ ॥

प्रकटितसकलार्थान्नारदाल्लब्धबोधो
जनयितृगुणवृत्तान्तविभाव्यां निवासात् ।
स्फुटमुनिपतिवाक्यो मन्मथोऽभात्तदानीं
दिनकरकरसङ्गात्पद्मखण्डो यथैव ॥ १९७ ॥

इति श्रीसिन्धुराजसत्कमहामहत्तमश्रीपर्पटगुरोः पण्डित-
श्रीमहासेनाचार्यस्य कृते प्रद्युम्नचरिते अष्टमः सर्गः ॥ ८ ॥

त्रुटिताखिलसन्धितक्षणा—
 त्वदमूञ्छिद्रशतैरलङ्कृतम् ॥ ६ ॥
इति तस्य विलोक्य सस्मितं
मुनिमाहार्यमहामतिर्भवान् ।
 अतिशिल्पविशेषकोविदो
भवतां नास्ति जगत्त्रये समः ॥ ७ ॥
 वचनं तदतीव पेशलं
मदनोक्तं विनिशम्य नारदः ।
 अयि वत्स जराधिकस्य मे
निपुणत्वं कुत इत्यवोचत ॥ ८ ॥
कुशलस्तरुणोसि सत्वरं
 कुरुषे किं न विमानमुत्तमम् ।
जननी तव दुःखिता परं
 किमु कालं गमयस्यनर्थकम् ॥ ९ ॥
मतिनो वचनात्तदद्भुतं
 मदनो विस्मयनीयमीदृशम् ।
विदधे च विमानमद्भुतं
 यशसः पुञ्जमिवात्मनः स्थिरम् ॥ १० ॥
उदितध्वजसभाकुलमञ्चं
 मौक्तिकस्रगनुलम्बितघंटम् ।
पञ्चवर्णमणिनिर्मितकूटं
 हाटकोज्ज्वलकटीतटपीठम् ॥ ११ ॥
चक्रवाकगरुडादिविहंगैः
 प्रोल्लसद्भिरुपरस्सरकल्पैः ।
मालशालकदलीप्रतिरूपैः
 हारिचित्रचमरावलिजालैः ॥ १२ ॥

रेटलोकमपदासुसुस्तुको
    नो मयानिति रुषा चमाण तम् ॥ १९ ॥
नतया स्थितमवेत्य विमानं
    तं मुनिर्वदति काम जनित्री ।
सा गता परिसरं यदि पूर्वं
    किं करिष्यसि मनः खलु पश्चात् ॥ २० ॥
यदपि प्रियतरं न मानितं
    कार्यमन्यदुद ते हितं मुधे ।
कान्यका हि यदयो निवेदिताः
    प्राकृपारिरनुजो हरिष्यति ॥ २१ ॥
श्रोत्रदादि वचनं निशम्य त—
    द्वायुवेगचलितोऽध्वकेतनः ।
पारिसाकपतितरंगचञ्चले—
    पततं व्यमुचदम्बुजो हरे ॥ २२ ॥
अथ विमानमचालि मनोभुवा
    मनसि वामदृशां नयनोत्सवम् ।
विकसिताननतामरसोभिरं
    द्रुतविलम्बितया क्रियया युतम् ॥ २३ ॥
खचरवासमदीघरलङ्घनं
    सपदि तां प्रविधाय मनस्विनी ।
घनधराधरसिन्धुपुरमजे—
    दंरवानुभ्य महीतलमाकुलम् ॥ २४ ॥
मुकुलकुसुमपुष्पन्मत्तभृङ्गालिरम्यं
    क्षितिरुहवलयक्षिप्याकुलां मालिनी याम् ।
खदिरपरसमेतां काटवीं पश्य यत्र
    कुपितसुरविपक्षेणार्भकस्त्यं विमुक्ता ॥ २५ ॥

घनतरंदपरम्भितयायिभिः
परिमलैरुपरिस्थितखेचरी ।
सलिलकेलिमघो वितृणोति या
भवतटिनीमिव पश्य धुनीमिमाम् ॥ ३२ ॥ युग्मम् ।

विमलवारितरंगमनोहरां
मदन पश्य पुरः सुरनिम्नगाम् ।
पृथुनितम्बनिविष्टसुराङ्गनां
मधुरगीतवशीकृतकिन्नरीम् ॥ ३३ ॥

इति निदर्शितवस्तुकुतूहला—
स्तुसमतीत्य शनैः कियदन्तरम् ।
रथगजाश्वपदातिसमाकुलां
समवलोकितवान्स वरूथिनीम् ॥ ३४ ॥

घनघनाघनकायमानिनीं
तां विलोक्य सहसा सविस्मयः ।
तात कस्य पृतना विलोक्यते
पृष्टवानिति मुनिमादरादिति ॥ ३५ ॥

यत्रास्ति हास्तिनपुरं प्रथितं पृथिव्यां
तत्राभवन्नरपतिः पुरुदेवतीर्थे ।
यो दानतीर्थमुपदर्श्य पुरा जनानां
श्रेयानिति प्रथममास यथार्थनामा ॥ ३६ ॥

तद्वंशभूषणमणिर्नृपतिर्बभूव
भूपालमौलिमणिरश्मिचयार्चितांघ्रिः ।
यत्संकथा समभवत्कुरुवंशनामा
वंशः प्रसिद्ध इह भूवलये समस्ते ॥ ३७ ॥

बहुष्वतीतेषु नृपेषु तत्र
वंशे धृतो नाम बभूव राजा ।

यदनया सदृशीं वनितां द्रुतं
ध्रुवमवाप्स्यसि मत्प्रियमाप्स्यते ॥ ५७ ॥

प्रथिलमेनमतः क्षिपताग्रतो
व्रजत किं कुरुते कुपितो हरिः ।
न हि किराटकमुल्कगृहीतिया—
वृषजने यतते मतिमाञ्जनः ॥ ५८ ॥

प्रजिघृक्षुमेयमथाशु समुद्यता
दधिरे धनुषातिविमर्पिणा ।
उभयकोटिनिरुद्धदिशा लस—
ल्ललितहासमुखस्य कराधिना ॥ ५९ ॥

प्रथममूनुरहं हरिवाधिकणो
नृपतिरस्मि न किं यमपासिमाम् ।
ललितवेषधरो न भवामि किं
यत इयं न वधूर्मम दीयते ॥ ६० ॥

ननु हरेरपि लोक इतो भवे—
त्क्व च मया सदृशा हरिसूनवः ।
यदि बलादपि यातुमभीप्सवो
व्रजत यूयमहं च यते तथा ॥ ६१ ॥

इति निगद्य निजाभिजनेक्षया
प्रतिसमान् जुहुवे कृतकुक्ककः ।
तदनु सायकमावृतसर्वदिग्
विविधमाविरभूद्दलमुद्धतम् ॥ ६२ ॥

असितमूर्तिधरं निशितायुधं
लकुटकाण्डशरादिपरिग्रहम् ।
जहि गृहाण कियत् क्व नु यासि वा
द्रुतमिति ब्रुवदाप समन्ततः ॥ ६३ ॥

सति जने सरयानरथस्थिते ।
तापसैःरमिपुष्प करोर्बलं
छलरूप विजितं सहसा तदा ॥ ७० ॥

इति निपात्य भटान् क्षणतोऽखिलां-
स्तुरगनागरथानपि मायया ।
परपृथुप्रसृता दुराकृतिः
तापसवेषधरो वियदुद्ययौ ॥ ७१ ॥

भिद्भुजंगममहाभयाकुलां
संनतश्वसितकम्पितस्तनीम् ।
तां विमानमुपनीय कन्यकां
नारदस्य पुरतो न्यवेशयत् ॥ ७२ ॥

तं तथाविकृतरूपधारिणं
त्वा विलोक्य मुहुरुद्धविह्वला ।
पश्य तात मम पूर्वदुष्कृतं
कथं निमन्द्य मुनिसाधिपावितीति ॥ ७३ ॥

येन नैव हरिसूनुरमितो
मामपत्नदनुजोऽपि याञ्छितः ।
आ दुराकृतिरपाहरत्कथ
मामभाग्यवसति खलेश्वरः ॥ ७४ ॥

अम्ब नैव मरणे विलोकिता
तात मां विपदि किं न रक्षसि ।
बान्धवाः किमिति दुःखभागिनीं
मां न पश्यत यतो न रक्षथ ॥ ७५ ॥

उद्धतश्वसितवेपितस्तन-
भस्तमन्यमुमुश्रती मुहुः ।

यक्षिदर्शनमहोत्सवभाजां
    मर्त्यलोकजनतामृतभूतम् ।
तद्वपुः स्मरपलोभ्य मृगाक्षी
    विस्मिता च हर्षिता च बभूव ॥८३॥ विशेषकं ।

तमपि भाग्यमभूतमवाप्य तौ
    विविधकेलिसमुल्लसिताननौ ।
समनुरक्तपरस्परमानसौ
    ददृशतुः पुनरुच्छ्रितनन्दनम् ॥ ८४ ॥

उदीर्णां द्वारवतीतिनाम्ना
    निदर्शयामास मुनिः पुरीं ताम् ।
या नागराणां विभवैर्विधात्रा
    दृष्टेव साक्षादमरी सुराणाम् ॥ ८५ ॥

मज्जत्पुरन्ध्रिकुचकुङ्कुमपिञ्जराम्बु—
    खातां सदा मदपतिर्गधवासभृताम् ।
मत्तद्विपेन्द्रकरटच्युतदानवारि—
    सञ्जातकर्दमसुदुर्गमराजमार्गाम् ॥ ८६ ॥

सायं सुधाधवलहर्म्यतलाधिरूढ-
    सीमन्तिनीवदनसंस्थितिभिर्न्दुबिम्बा ।
शुभ्रप्रतोलिषु निवेशितनीलरत्न—
    मायाभिरामालिकलद्विगामतलोकलक्ष्याम् ॥ ८७ ॥

शुभ्रांशुबिम्बकुसुमः प्रभुरम्बुजाख्या
    निःसंख्यपत्रात्वदलाः स्फुटरत्नभासः ।
यस्यामसङ्ख्यपरिपीतपयाश्च यस्य
    सिन्धोः श्रयत्यविकलां श्रियमद्भुतवाप्यः ॥ ८८ ॥

यस्यां मत्तभ्रमरमुखराः पादपा नित्यरम्याः
पश्चिमोऽपि प्रतिदिशममलं पुष्पमालाभिरामाः ।

कश्चिद्विकम्पितशिरःकरपादयुग्म-
मुग्धो वयःसममिमं तुरगं गृहीत्वा ।
चङ्क्रमणप्रत्ययनमाट स तत्र यत्र
भानुः स्वयं कृततुरङ्गमवाह्यमास्ते ॥ ९५ ॥

अश्वः कस्य किमत्र धारयसि भो देटावृकस्त्वं किमु
विक्रीणासि नु वा हय स्वयमथो पप्रच्छ भानुस्तदा ।
तं प्रत्याह स वल्लभात्तनुभवस्त्वं चक्रपाणेः सुतो
योग्योऽयं वपुरन्यदुर्लभतमो यदर्थिता स्वीकुरु ॥ ९६ ॥

मूल्यं किमस्य न समाह सुवर्णकोटी
किं मर्म्मे नैव तुलनां तुरगः समर्थः ।
किं दृश्यते सफलमेव हि वस्तु लोके
प्राह्णं परीक्ष्य यदि कार्यमुतावधार्यम् ॥ ९७ ॥

एवं करोम्यार्य ससंभ्रमो द्रुतं
समारुरोहाश्वमतीव चञ्चलम् ।
अश्वोऽपि वल्गान् सयातिवेगतो
ऽनुरञ्जयामास यथास्य मानसम् ॥ ९८ ॥

भ्रान्त्या स्थलीलमथ चक्रपदं ततोऽनु
वेगात्ततः पतितपल्लवपिभूषणं तम् ।
कृत्वा भयाकुलमधोऽश्वमनुभेयं
तस्थौ प्रयास्य च पुरोऽस्य हयो विनीतः ॥ ९९ ॥

अनेकराजन्यरथाश्वसंकुलं
महाभिमानैकधनं स पातितम् ।
विलोक्य भानुं कृतहस्तताडनः
प्रहस्य दक्षः सहसेति चावदत् ॥ १०० ॥

तव कीर्तिरशेषभूतलं
प्रसनोत्पभ्वसुशिक्षयार्जिता ।

इति वाचमतीव गर्वसारां
हरिसूनुः प्रमदावहां निशम्य ।
निजभृत्यजनान् जगाद दाका-
निममारोपयतेति कौतुकेन ॥ १०८ ॥

उद्धृतः क्षितितलादथ टक्को
माययोपरि पपात गुरुः सः ।
कूर्पराङ्घ्रिरदनास्यशिरांसि
स्फोटयन्नखिलभृत्यजनस्य ॥ १०९ ॥

केचिदत्र विगताखिलचेष्टा
मूर्छिता धरणिपीठमवापुः ।
कम्पमानवपुष पुनरन्ये
तस्थुरर्पितभुजाः करपत्रे ॥ ११० ॥

पातितोऽस्म्यहह कष्टमायिभि—
र्वैभिराः कटिरिव व्यथते मे ।
निस्वनन्निति सुपीवरगात्र—
स्तान् ममर्द च जगाद च भानुम् ॥ १११ ॥

नाथयो मम जनाश्च वराका
धर्तुमेव न च मां खलु दाकाः ।
कौतुकं च महदस्ति ततो मा—
मन्यथोद्धरत पश्यत शिक्षाम् ॥ ११२ ॥

इत्युदीर्णमुपकर्ण्य वलिष्ठा-
नादिदेश हरिसूनुरदोषान् ।
आददोपयितुकान् युगपत्ते
प्रोधुपुर्नृपसुताः सममेव ॥ ११३ ॥

तेपि तद्विपिमथापुरदोषा
उज्जिहीर्षुरथ तं जडगात्रम् ।



तद्वचश्च स निशम्य तान् जगौ
　　रक्षका भवत निष्ठुराः किमु ।
ध्यानमानपुरुषान्तरे न वा
　　वेत्ति योऽस्य पुरतो वृथा वचः ॥ १२१ ॥

तज्ञरश्च तृणमात्रभक्षिणां
　　रक्षता मम हता वनान्तरे ।
पश्यामि यदि च प्रभूततां
　　मुद्रिकाप्रदपकं मयोत्तमाः ॥ १२२ ॥

तन्निशम्य मुद्रिकाभ्यन्तरस्थिता-
　　न्नं गृहीतपरमुद्रिका जगुः ।
एवमस्तु परितोऽत्र पुस्तक
　　भक्षयन्तु तृणजातमिच्छया ॥ १२३ ॥

तान् जगाद पुनरित्यसौ हया
　　यथमी व्यथितगात्रकाः क्षुधा ।
पत्रपुष्पफलभक्षणं ध्रुवं—
　　स्तौ निषेकमुचितास्ततः क्षणम् ॥ १२४ ॥

तन्निशम्य जगदुः परस्परं
　　ते रमन्त इति किं तु पक्षमाः ।
आगयत्यल्पदमनत्र कुर्वते
　　इत्युदीर्य शिथिला गताः पुरीम् ॥ १२५ ॥

तद्वनं सपदि नन्दनोपमं
　　स्थण्डिलीकृतमनंगवाजिभिः ।
तत्सरांस्यपि महान्ति तत्क्षणा—
　　च्छोषितानि भृगुपद्मभूषणैः ॥ १२६ ॥

मातृकार्यकरणैकतत्परो
　　वीक्ष्य शून्यमखिलं वनं ततः ।

घूर्णितभानुजनः क्षणतोऽसौ
क्रीडितवांश्च चिरं प्रतिवीथि ॥ १४१ ॥

दंशमहामशकादिभिरुग्रै-
र्नाशितशेषजनोऽतिरुरोध ।
मार्गमितस्तत उन्मुखधावन्
स्यन्दनकेन सुतोऽथ मुरारेः ॥ १४२ ॥

त प्रविलोक्य जना जगुरेवं
कोऽयमहो पुरुषो विकृतिस्थः ।
क्रीडति धीरमतिः पुरि विष्णो-
र्धावदुदुष्टस्वराहितचक्री ॥ १४३ ॥

किन्नर एष खगः सुरनाथ
पन्नगराडुत दैत्यवरो वा ।
जालमिदं सुरगस्य नु माया
स्वप्नमहं किमु पश्यत आसम् ॥ १४४ ॥

इत्यतिविस्मितधी पुरलोक
कामममन्दय पश्यदमुष्य ।
हास्यभृदुक्तजना करमाद
दर्शन विधाय चिरं प्रतुतोष ॥ १४५ ॥

क्रीडितमन्यजनैर्दुरपापं
तत्र विधाय ततः प्रविवेश ।
सत्यवतीगृहमध्यनिविष्टां
प्राप पवित्रजलामुरवापीम् ॥ १४६ ॥

तत्र समागतवत्तु निजाधिपा
स्नानमती प्रतिपालयुपान्ता ।
विद्धि मनोभव मातुलपत्न्या
स्त्रीजनरक्षणदक्षां परवापीम् ॥ १४७ ॥

विद्याधराख्यं लभिताम्यांगजन्मा
दृष्टोस्यन्तं क्वं परावृत्य देहम् ।
दण्डी दण्डी कुण्डिकायोगपट्टः
भुस्यापायी वेदविर्लिपगलाद्यः ॥ १४८ ॥

काम्यालाम्ब अंगपायकाः शद्मैः
कोपी गर्मी गुणपलोपवीती ।
विप्रो वृद्ध कम्पिताङ्गगात्रो
भूरपा रामा यावतं ताः स संयम् ॥ १

पुष्पो दन यातु मतां
वारूपां तीर दास्यर्थं च ।
काल्याप्येतद्दत्तं येन
भोक्तुं पुर्या प्रामोम्यम्याम् ॥ १५० ॥

श्रुत्वैव ताः प्रोचुर्विप्रं
विष्णोरिष्टा भार्या त्वस्या ।
भानोर्माता सौभाग्याब्धि-
स्तस्या धात्री भात्येव या ॥ १५१

दारिद्र्यपावकतुस्तनी
हंसवृन्दचारुगामिनी ।
अंगनेय वल्लभा नृणां
भद्र दुर्लभा हि पापिनाम् ॥ १५

पाद्यभोजनपापहरवीरैः
पौरजनैरपि पूजितपादः ।
विष्णुरिहकतमो वनिताभि—
लघुनुओपि च मज्जति मान्य

स विनिशम्य जगाद

वेद्यांधिद्विजपरप्रथितात्मा
  भ्रान्तिरस्ति यदि यः शृणुतोकम् ॥ १५४

भूपतिर्गजपुरे कुरुवंशो
  यः सुयोधन इति प्रथितोऽस्ति ।
प्राद्दिणोऽभिजसुतां स च भानोः
  सा हृताद्य पथ एव न सिद्धिः ॥ १५५ ॥

तेऽपि तां निजगमेकपनिम्यु
  सोऽपि तां समवलोक्य निदध्यौ ।
नोचिता मम वधूरिषभार्या
  क्षत्रियस्य कुलजस्य च योग्या ॥ १५६ ॥

इत्यसौ किल निगद्य तदार्तिं
  वाचयाल पथि तत्र स यत्र ।
[illegible]—
  स्ता विवेश च न [illegible] ॥ १५७ ॥

[illegible]—
  [illegible] मनुजेषु ।
तेन विष्णुतनयः किमु यस्ते
  [illegible] संकुल ॥ १५८ ॥

[illegible]
  [illegible] ।
[illegible]
  [illegible] ॥ १५९ ॥

[illegible]
  [illegible] ।
[illegible]
  [illegible] ॥ १६० ॥

ब्राह्मणाय कुपिता हठपूर्वा
    स्ताः प्रविश्य परिघमुद्धृत्यैनम् ।
भग्न गात्रपरिताडनमाताः
    दौर्मनाः स्मसमयंस्य विरूपाः ॥ १६१ ॥

वीक्ष्य रूपमतिशायि निजं ता-
    स्तं परस्परमुखेक्षणमाहुः ।
चित्रमाये तदतीव यदेवं
    त्वं करोष्युपहतिं कुपितोऽपि ॥ १६२ ॥

सुन्द पृथुकुचजघनस्थलरम्याः
    श्रवणलपनपवनामृतयुक्ताः ।
द्विजवर निरुपम भो द्रुतमनय-
    प्रणतिविनतशिरसो वयमपि ते ॥ १६३ ॥

इति निशम्य वचो द्विजसत्तमो-
    व्यकृत रम्यतमं युवतीजनम् ।
भवत एव विधाय विदांवरः
    सकलतोयहरो निरगात्ततः ॥ १६४ ॥

भृंगसन्निभशिखाः कचैर्बभूवुरंगनाः
    काञ्चनाचलनासिका वरांशिका क्षणेन ताः ।
कर्णपूरपूरिताः पराः कुल्यानतांगिका
    मन्मथेन निर्मितास्सुदामलम्भयुग्मयः ॥ १६५ ॥

अहो छलिता वै वयं विप्रकेण
    विगुणाय सर्वं हृतं चापि तोयम् ।
खलेनात्र कुर्मो वयं किं वराक्यः
    स्फुटं चेति याह रुषा ताम्रनेत्राः ॥ १६६ ॥

तृषायुक्त तोयेन विना युवत्यो
    पद्मस्यो द्विजः पापकर्मा क्व यातः ।